२भूयोजाते त्रि०। भावे अप्। १पुनरुत्पादे पु०कुमा०१सर्ग०

**पुनर्भू** स्त्री पुनर्भवति जायात्वेन भू–क्विप्। एकेन व्यूढायां पुनरन्यगृहीतायां भार्य्यायाम् अन्यपूर्वायाम् अन्यपूर्वा॰शब्दे २१२ पृ० दृश्यम्। [२।२।१।२०।

**पुनर्मृत्यु** पु० भूयोभूयो मृत्युः। भूयोभूयोमरणे शत०ब्रा०

**पुनर्यज्ञ** पु०भूयः कार्य्ये यज्ञे। कात्या०श्रौ०२५।१।२०भाष्यम्।

**पुनर्यात्रा** स्त्री १प्रत्यागतौ जगन्नाथस्य पुनर्वारं २रथयात्रायाञ्च “पुनर्यात्रा विधातव्या तथैव नवमेऽहनि” ति०त०। सा च द्वितीयातो नवमदिने दशम्यां कर्त्तव्याऽहनृशब्दस्य चान्द्रदिनपरत्वात्। ३पुनर्वारगमने च।

**पुनर्वत्** त्रि० पुनः पुनःशब्दोऽस्त्यस्य मतुप् मस्य वः। पुनःशब्दयुक्ते कात्या० २१।१०।२७ भाष्यम्।

**पुनर्वसु** पु०पुनर्+वस–उ। १विष्णौ “विश्वयोनिः पुनर्वसुः” विष्णुस० पुनः पुनः सर्वशरीरेषु क्षेत्रज्ञरूपेण वसतीति पुनर्वसुः, भाष्यम्। २शिवे च अश्विन्यवधिके सप्तमे ३नक्षत्रे द्वि॰व०। ४कात्यायनमुनौ ५लोकभेदे ६धनारम्भे च शब्दच०। अश्विन्यादिषु मध्ये सप्तमनक्षत्रस्वरूपाधिदेवादि अश्लेषाशब्दे ४८७पृ०दर्शितम्। तदीयाद्यचरणत्रयं मिथुनराशिघटकम् शेषपादस्तु कर्कटराशिघटकः। तस्य द्विवचनान्तत्वं तु प्रायिकं “पुनर्वसौ कृतो विप्रः” इत्यादिप्रयोगात्। नक्षत्रार्थे तिष्येण सह द्वन्द्वे अस्य द्विवचनान्तता, तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू पुनर्वसुनक्षत्रस्य द्विवचनत्वेन बहुत्वे प्राप्ते द्वित्वविधानम्। कुकुरवंश्ये ४नृपभेदे हरिवं०४२अ०।

**पुन्नाग** पु० पुमान् नाग इव श्रेष्ठत्वात् स इव वा। १स्वनामख्याते पुष्पप्रधाने वृक्षे अमरः “पुन्नागपुष्पं मधुरं सुगन्धि शीतलं तथा। मलप्रसादनकरं पित्तनाशनमेव तत्” राजनि०। २सितोत्पले ३जातीफले ४नरश्रेष्ठे ५पाण्डुनागे च मेदि०।

**पुन्नाट(ड)** पु० पुमानिव नाटयति नाटि–अच्। चक्रमर्दे राजनि०। नाडि–अच्। पुन्नाडोऽप्यत्र।

**पुन्नामन्** पु० पुदिति नामास्य। १नरकभेदे “पुंनाम्नो नरकात् यस्मात्” मनुः। तन्नरकगतिकारणञ्च षोडशविधं यथोक्तं वामनपु० ५८अध्याये

“परदाराभिगमनं पापानाञ्चोपसेवनम्। पारुष्यं सर्वभूतानां प्रथमं नरकं स्मृतम्। फलस्तेयं महापापं फलाहस्य च पाटनम्। पाटनं वृक्षजातीनां द्वितीयं परिकीर्त्तितम्। वर्ज्यादानं तथा द्विष्टवध्यवधबन्धनम्। विवादित्वमहेतुत्वं तृतीयं नरकं स्मृतम्। भयदं सर्वसत्त्वानां नरभूतिविनाशनम्। भ्रंशनं निजधर्माणां चतुर्थं नरकं स्मृतम्। मारणं मित्रकौटिल्यं मिथ्याभिशपनञ्च यत्। मिष्टैकाशनमित्युक्तं पञ्चमञ्च विपाचनम्। परोहणं यन्त्रकरं वमनं योगनाशनम्। यानमुख्यस्य हरणं षष्ठमुक्तं नृपार्थनम्। राजभागस्य हरणं राजजायानिषेवणम्। राज्ये त्वहितकारित्वं सप्तमं नरकं स्मृतम्। लुब्धत्वं लोलुपत्वञ्च लब्धधर्मार्थनाशनम्। नानाकर्मकरं प्रोक्तमष्टमं नरकं स्मृतम्। ब्रह्मस्वहरणञ्चैव ब्राह्मणानां विनिन्दनम्। विरोधो ब्राह्मणैश्चोक्तो नवमो नरकस्त्वयम्। शिष्टाचारविनाशञ्च मित्रद्वेषं शिशोर्वधम्। शास्त्रस्तेयं धर्मशून्यं दशमं परिचक्षते। षडङ्गनिधनं घोरं षाड्गुण्यप्रतिषेधनम्। एकादशममेवोक्तं नरकं सद्भिरुत्तम!। सद्भिरुक्तं सदाचारं विना चारोद्भवत्क्रिया। संस्कारपरिहीनत्वमिदं द्वादशमं स्मृतम्। हानिर्धर्मार्थकामानामपवर्गस्य हारणम्। स्वर्गहर्तृस्य मतिदं त्रयोदशमथोच्यते। समलं धर्महीनञ्च यद्वर्ज्यं यच्च दोषजम्। चतुर्दशकमेवोक्तं नरकं सद्विगर्हितम्। अज्ञानञ्चाप्यनिष्ठत्वमशौचमशुभावहम्। गर्ह्यं तत्पञ्चदशकमसत्यवचनानि च। आलस्यं चाततायित्वमगारेष्वग्निदापनम्। इच्छा च परदारेषु नरकाय निगद्यते। ईर्ष्याभावस्य सभ्येषु औद्धत्यन्तु विगर्हितम्। एतैस्तु पापैः पुरुषः पुन्नामनरके पतेत्। पुन्नामनरकं घोरं विनाशं प्राह सर्वतः। एतस्मात् कारणात् त्राता ततः पुत्त्रो निगद्यते”। पुमान् पुंलिङ्गनामास्य नक्षत्रगणभेदे “हस्तो मूलश्रवणपुनर्वसुमृगशिरस्तथा पुष्यः। गर्भाधानादिकार्य्येषु पुन्नामायं गणः शुभदः” ज्यो० त०।

**पुप्पुट** पु० “दन्तवेष्टः सोपकुशः पीताभो दन्तपुप्पुटः” इति सुश्रुतोक्ते १क्षुद्ररोगे “नीरुक् स्थायी कोलमात्रः कफात् स्यात् मेदोयुक्तात् पुप्पुटस्तालुदेशे” तत्रोक्ते २तालुगते रोगभेदे च।

**पुप्पुस** पु० (फोफरा) ख्याते १क्लोमे पद्मबीजाधारे २बीजकोषे च हेमच०। फुप्फुस इति पाठान्तरं तत्रार्थे।

**पुमस्** पु० पाति पा–पालने “पातेर्डुमसुन्” उणा०डुमसुन्। १पुरुषे २मनुष्यजातिमात्रे च अमरः। सत्त्वप्रधानत्रिगुणकार्ये शब्दसंस्कारविशेषयुक्ते शब्दे च। सर्वनामस्थाने परे असुन् पुमांसौ पुमांस इत्यादि समासे पदान्तत्वे अनु-